महादानविशेषः । यथा,—

मत्स्य उवाच ।

"अथातः संप्रवक्ष्यामि ब्रह्माण्डविधिमुत्तमम् ।
यच्छ्रेष्ठं सर्व्वदानानां महापातकनाशनम् ॥
पुण्यं दिनमथासाद्य तुलापुरुषदानवत् ।
ऋत्विङ्मण्डपसम्भारभूषणाच्छादनादिकम् ॥
लोकेशावाहनं तद्वदधिवासनकं यथा ।
कुर्य्याद्विंशपलादूर्द्ध्वमासहस्राच्च शक्तितः ॥
कलसद्वयसंयुक्तं ब्रह्माण्डं काञ्चनं बुधः ।
दिग्गजाष्टकसंयुक्तं षड्वेदाङ्गसमन्वितम् ॥
लोकपालाष्टकोपेतं मध्यस्थितचतुर्म्मुखम् ।
शिवाच्युतार्कशिखरमुमालक्ष्मीसमन्वितम् ॥
वस्वादित्यमरुद्गर्भं महारत्नसमन्वितम् ।
वितस्तेरङ्गुलशतं यावदायामविस्तरम् ॥
कौशेयवस्त्रसम्वीतं तिलद्रोणोपरि न्यसेत् ।
तथाष्टादश धान्यानि समन्तात् परिकल्पयेत् ॥
पूर्ब्बेणानन्तशयनं प्रद्युम्नं पूर्ब्बदक्षिणे ।
प्रकृतिं दक्षिणे देशे सङ्कर्षणमतः परम् ॥
पश्चिमे चतुरो वेदाननिरुद्धमतः परम् ।
अग्निमुत्तरतो हैमं वासुदेवमतःपरम् ॥
समन्ताद्गुडपीठस्थानर्च्चयेत् काञ्चनान् बुधः ।
स्थापयेद्वस्त्रसंयुक्तान् पूर्णकुम्भान् दशैव तु ॥
दशैव धेनवो देयाः सहेमाम्बरदोहनाः ।
पादुकोपानहच्छत्रचामरासनदर्पणैः ॥
भक्ष्यभोज्यान्नदीपेक्षुफलमाल्यानुलेपनैः ।
होमाधिवासनान्ते तु स्नापितो वेदपुङ्गवैः ।
इममुच्चारयेन्मन्त्रं त्रिः कृत्वाथ प्रदक्षिणम् ॥
नमोऽस्तु विश्वेश्वर ! विश्वधाम
जगत्सवित्रे भगवन्नमस्ते ।
सप्तर्षिलोकामरभूतलेश !
गर्भेण सार्द्धं वितरामि रक्षाम् ॥
ये दुःखितास्ते सुखिनो भवन्तु
प्रयान्तु पापानि चराचराणाम् ।
त्वद्दानशस्त्राहतपातकानां
ब्रह्माण्डदोषाः प्रलयं व्रजन्तु ॥
एवं प्रणम्यामरविश्वगर्भं
दद्याद्द्विजेभ्यो दशधा विभज्य ।
भागद्वयं तत्र गुरोः प्रकल्प्य
समं भजेच्छेषमतः क्रमेण ॥
स्वल्पे तु होमे गुरुरेक एव
कुर्य्यादथैकाग्निविधानयुक्त्या ।
स एव संपूज्यतमोऽल्पवित्तै-
र्यथोक्तवस्त्राभरणादिकेन ॥
इत्थं य एतदखिलं पुरुषोऽत्र कुर्य्याद्
ब्रह्माण्डदानमधिगम्य महद्विमानम् ।
निर्द्धूतकल्मषविशुद्धतनुर्म्मुरारे-
रानन्दकृत्पदमुपैति सहाप्सरोभिः ॥
सन्तारयेत् पितृपितामहपुत्त्रपौत्त्रान्
बन्धुप्रियातिथिकलत्रशताधिकः सः ।
ब्रह्माण्डदानशकलीकृतपापकौघ-
मानन्दयेच्च जननीकुलमप्यशेषम् ॥
इति पठति शृणोति वा य एतत्
सुरभवनेषु गृहेषु धार्म्मिकाणाम् ।
मतिमपि च ददाति मोदतेऽसा-
वमरपतेर्भवने सहाप्सरोभिः ॥"

इति मत्स्यपुराणे महादानानुकीर्त्तने ब्रह्माण्डदानको नाम २५० अध्यायः ॥*॥ अपि च ।
"इदानीं कार्त्तिकी चेयं वर्त्ततेऽद्य नराधिप ! ।
ब्रह्माण्डं सर्व्वसम्पन्नं भूतरत्नौषधीयुतम् ॥
देवदानवयक्षैश्च युक्तमेतत् सदा विभो ! ।
एतद्धेममयं कृत्वा सर्व्वबीजरसान्वितम् ॥
सरत्नं पुरुषं कृत्वा कार्त्तिक्यां द्वादशीदिने ।
अथवा पञ्चदश्यां वै कार्त्तिक्याञ्चैव नान्यतः ॥
पुरोहिताय गुरवे दापयेद्भक्तिमान्नरः ।
ब्रह्माण्डोदरवर्त्तीनि यानि भूतानि पार्थिव ! ।
तानि दत्तानि तेन स्युः समासात् कथितं तव ॥
यो यज्ञैर्यजते राजन् ! सहस्रवरदक्षिणैः ।
सेकोद्देशो यजेत्तस्य ब्रह्माण्डस्य विशेषतः ॥
यः पुनः सकलञ्चेदं ब्रह्माण्डं दातुमिच्छति ।
तेन यष्टं कृतं दत्तं पठितं कीर्त्तितं भवेत् ॥"

वराह उवाच ।

"एतत् श्रुत्वा ततो राजा हेमकुम्भे प्रकल्पनम् ।
ब्रह्माण्डस्यपये प्रादात् सपिधानञ्च तत्क्षणात् ॥
सर्व्वकामैः सुसम्प्रीतो ययौ स्वर्गं नराधिपः ॥"

इति वराहपुराणम् ॥

ब्रह्मात्मभूः, पुं, (ब्रह्मण आत्मनः शरीरात् भवतीति । ब्रह्मात्मन् + भू + क्विप् ।) अश्वः । इति शब्दमाला ॥ (अस्य ब्रह्मशरीरजातत्वमुक्तं वृहदारण्यकोपनिषदि ।१।२।६-७। तद् यथा,—
"प्राणा वै यशोवीर्य्यं तत्प्राणेषूत्क्रान्तेषु शरीरं श्वयितुमध्रियत तस्य शरीर एव मन आसीत् । सोऽकामयत मेध्यं म इदं स्यादात्मन्व्यनेन स्यामिति । ततोऽश्वः समभवद्यदश्वत्तन्मेध्यमभूदिति तदेवाश्वमेधस्याश्वमेधत्वम् ।" अत्र शाङ्करभाष्यं यथा,—
"प्राणाश्चक्षुरादयः । वै यशो यशोहेतुत्वात्तेषु हि सत्सु ख्यातिर्भवति । तथा वीर्य्यं बलमस्मिन् शरीरे । नह्युत्क्रान्तप्राणो यशस्वी बलवान् भवति । तस्मात् प्राणा एव यशो वीर्य्यं चास्मिन् शरीरे । तदेवं प्राणलक्षणं यशोवीर्य्यमुदक्रामत् उत्क्रान्तवत् तदेवं यशोवीर्य्यभूतेषु प्राणेषूत्क्रान्तेषु शरीरान्निष्क्रान्तेषु तच्छरीरं प्रजापतेः श्वयितुमुच्छूनभावङ्गन्तुमध्रियतामेध्यञ्चाभवत् । तस्य प्रजापतेः शरीरान्निर्गतस्यापि तस्मिन्नेव शरीरे मन आसीत् । यथा कस्यचित् प्रिये विषये दूरङ्गतस्यापि मनो भवति तद्वत् । स तस्मिन्नेव शरीरे गतमनाः सन् किमकरोदिति ॥ उच्यते सोऽकामयत कथं मेध्यं मेधार्हं यज्ञियं मे ममेदं शरीरं स्यात् । किञ्चात्मन्वी आत्मवांस्तेन शरीरेण शरीरवान् स्यामिति प्रविवेश । यस्मात्तच्छरीरं मद्वियोगाद्गतयशोवीर्य्यं सदश्वदश्वयत् ततस्तस्मादश्वः समभवत् । ततोऽश्वनामा प्रजापतिरेव साक्षादत्र स्तूयते । यस्माच्च पुनस्तत्प्रवेशात् गतयशोवीर्य्यत्वादमेध्यं सन्मेध्यमभूत् तदेव तस्मादेवाश्वमेधस्याश्वमेधनाम्नः क्रतोरश्वमेधत्वमश्वमेधनाम लाभः ॥")

ब्रह्मादनी, स्त्री, हंसपदी । इति राजनिर्घण्टः ॥

ब्रह्मादिजाता, स्त्री, (ब्रह्मणः आदिजाता सम्भूता । क्वचित् ब्रह्माभिजाता इति पाठो दृश्यते ।) गोदावरी । इति राजनिर्घण्टः ॥

ब्रह्मापेतः, पुं, (ब्रह्माणं ब्रह्मतेजःस्वरूपं सूर्य्यमुपेत उपगतः ततः पृषोदरात् साधुः ।) माघमासे सूर्य्यनिकटस्थितराक्षसः । यथा,—
"त्वष्टा च यमदग्निश्च कम्बलोऽथ तिलोत्तमा ।
ब्रह्मापेतोऽथ ऋतजित्धृतराष्ट्रश्च सप्तमः ॥
माघमासे वसन्त्येते सप्त मैत्रेय ! भास्करे ।"
इति विष्णुपुराणे । २ । १० । १५ ॥

ब्रह्मारण्यं, क्ली, (ब्रह्मणो वेदस्य अरण्यमिव ।) वेदपाठभूमिः । इति त्रिकाण्डशेषः ॥

ब्रह्मार्पणं, क्ली, (ब्रह्मैवार्पणमितिविग्रहे यदर्पणं तद्ब्रह्मैव । यथा, गीतायाम् । ४ । २४ ॥
"ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणाहुतम् ॥"
"ब्रह्मार्पणं येन करणेन प्रकारेण ब्रह्मविद्भिरन्यावर्पयति तद्ब्रह्मैवेति पश्यति तस्यात्मव्यतिरेकेणाभावं पश्यति यथा शुक्तिकायां रजताभावं पश्यति तदुच्यते ब्रह्मैवार्पणमिति यथा यद्रजतं तच्छुक्तिकेवेति । ब्रह्म अर्पणमित्यसमस्ते पदे यदर्पणबुद्ध्या गृह्यते लोके तदस्य ब्रह्मविदो ब्रह्मैवेत्यर्थः । इति शाङ्करभाष्यम् ॥) ब्रह्मणि समर्पणम् । तत्प्रकारा यथा,
"ब्रह्मणा दीयते देयं ब्रह्मणे संप्रदीयते ।
ब्रह्मैव दीयते चेति ब्रह्मार्पणमिदं परम् ॥
नाहं कर्त्ता सर्व्वमेतद्ब्रह्मैव कुरुते तथा ।
एतद् ब्रह्मार्पणं प्रोक्तं ऋषिभिस्तत्त्वदर्शिभिः ॥
प्रीणातु भगवानीशः कर्म्मणानेन शाश्वतः ।
करोति सततं बुद्ध्या ब्रह्मार्पणमिदं परम् ॥
यद्वा फलानां संन्यासं प्रकुर्य्यात् परमेश्वरे ।
कर्म्मणामेतदप्याहुर्ब्रह्मार्पणमनुत्तमम् ॥"
इति कूर्म्मपुराणे ४ अध्यायः ॥

ब्रह्मावर्त्तः, पुं, (ब्रह्मणां ब्रह्मनिष्ठब्राह्मणानामावर्त्त इव । बहुलब्राह्मणाश्रयत्वादस्य तथात्वम् ।) देशविशेषः । तत्पर्य्यायः । तपोवटः २ । इति त्रिकाण्डशेषः ॥ तत्परिमाणादि यथा,—
"सरस्वतीदृशद्वत्योर्द्देवनद्योर्यदन्तरम् ।
तद् देवनिर्म्मितं देशं ब्रह्मावर्त्तं प्रचक्षते ॥
तस्मिन् देशे य आचारः पारम्पर्य्यक्रमागतः ।
वर्णानां सान्तरालानां स सदाचार उच्यते ॥
कुरुक्षेत्रञ्च मत्स्याश्च पञ्चालाः शूरसेनकाः ।
एष ब्रह्मर्षिदेशो वै ब्रह्मावर्त्तादनन्तरः ॥
एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्व्वमानवाः ॥"
इति मानवे । २ । १७-२० ॥
(तीर्थविशेषः । यथा, महाभारते ।३।८३।५०।
"ततो गच्छेत धर्म्मज्ञ ! ब्रह्मावर्त्तं नराधिप ! ।
ब्रह्मावर्त्ते नरः स्नात्वा ब्रह्मलोकमवाप्नुयात् ॥"